## दीर्घात् । (७५/१४८)

छे तुक् इति वर्तते । दीर्घात् परो यः छकारः तस्मिन्[1] पूर्वस्य तस्यैव दीर्घस्य तुगागमो भवति । ह्लीच्छति । [2]म्लेच्छति । [3]अपचाच्छायते । विचाच्छायते ॥

## पदान्ताद्वा । (७६/१४९)

दीर्घात् छे तुक् इति वर्तते । पदान्ताद् दीर्घात् परो यः छकारः तस्मिन् [4]पूर्वस्य तस्यैव दीर्घस्य पूर्वेण नित्यं प्राप्तो वा तुगागमो भवति । कुटीच्छाया, कुटीछाया । कुवलीच्छाया, कुवलीछाया ।

[६७२] विश्वजनादीनां छन्दसि वा तुगागमो भवतीति वक्तव्यम् । (म. भा. ३. ५१)

विश्वजनच्छत्रम्, विश्वजनछत्रम् । 'न च्छायां करवोऽपरम्' (अ. वे. १३. ३. ५६) । न छायां करवोऽ-परम् ॥

## इको यणचि । (७७/४७)

अचि परतः इको यणादेशो भवति[5] । [6]दध्यत्र । मध्वत्र । [7]कर्त्रर्थम् । लाकृतिः[8] ।

[६७३] इकः प्लुतपूर्वस्य सवर्णदीर्घबाधनार्थं यणादेशो वक्तव्यः ।

भो३इ इन्द्रम् । भो३यिन्द्रम् । अचि इति चायमधिकारः 'संप्रसारणाच्च' (६. १. १०८/३३०) इति यावत् ॥

## एचोऽयवायावः । (७८/६१)

एचः स्थाने अचि परतः अय् अव् आय् आव् इत्येते आदेशाः यथासङ्ख्यम् भवन्ति । चयनम् । लवनम् । चायकः । लावकः । कयेते । ययेते । [9]वायाववरुणद्धि ॥

## वान्तो यि प्रत्यये । (७९/६३)

योऽयमेचः स्थाने वान्तादेशः ओकारस्य अव्, औकारस्य आव्, स यकारादौ प्रत्यये परतो भवति । बाभ्रव्यः । माण्डव्यः । शङ्कव्यं दारु । पिचव्यः कार्पासः । नाव्यो ह्रदः । वान्तः इति किम् ? रायमिच्छति [10]रैयति । यि इति किम् ? गोभ्याम् । नौभ्याम् । प्रत्यये इति किम् ? गोयानम् । नौयानम् ।

---

1. परतः इत्यधिकम् ड, परभूते इत्यधिकम् क. 2. म्लीच्छति ड. 3. उदाहरणमिदं नास्ति फ. 4. परभूते इत्यधिकम् क, परतः इत्यधिकम् ड. 5. संहितायाम् इत्यधिकम् फ. 6. शम्यत्र वध्वाकृतिः फ. 7. कर्त्रश्वः फ. 8. इकः इति किम् ? वागत्र इत्यधिकम् फ. ह. 9. कावावरुणद्धि क. ड. फ. ह. 10. रैय्यति ह.